# Shri Raghavendra Daridryamochana Stotram

# શ્રીરાઘવેન્દ્રદારિદ્ર્યમોચનસ્તોત્રમ્

## Document Information

Text title : Shri Raghavendra Daridryamochana Stotram

File name : rAghavendradAridryamochanastotram.itx

Category : deities_misc, gurudev, stotra

Location : doc_deities_misc

Author : Krishna Avadhutapandita Vedavyasacharya

Proofread by : Gopalakrishnan, PSA Easwaran

Description/comments : from Raghavendra Tantram

Latest update : December 18, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 18, 2021

*sanskritdocuments.org*

Shri Raghavendra Daridryamochana Stotram

# શ્રીરાઘવેન્દ્રદારિદ્ર્યમોચનસ્તોત્રમ્

શ્રિતાનાં પાદં તે સકલવિધયા શોકહરણઃ
    ત્વમેવામ્બા તાતસ્ત્વમસિ મમ મિત્રં સરલહૃત્ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૧॥

રતં વા દુષ્ટાર્યે ત્યજતિ સુતમમ્બા કિમુ પિતા
    કૃપાં કૃત્વા શિશ્નોદરકૃતમહાગસ્યપિ મયિ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૨॥

ધનાઢ્યો વા દીનો વાવયવવિકલો વાક્ષવિકલઃ
    પ્રપન્નશ્ચેત્પાદં તવ સુખયસીત્યાગમમહમ્ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૩॥

વદાન્યાત્ ત્વદ્ભૂમૌ દિવિ સુરભિકલ્પદ્રુમદૃષદાં
    લઘુત્વં જાનેઽહં વિતરણમિદં વીક્ષ્ય ભવતઃ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૪॥

દ્રવત્કારુણ્ય શ્રીપરિમલસમુદ્ધારિહૃદય
    ત્વદન્યો દાતા ચેદ્ભવતિ કથમાયામિ વાદ મે ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૫॥

યથાશક્ત્યાઽઽરાધ્ય પ્રસભમમરાનપ્યથ નરાન્
    વ્રજન્ દેશં દેશં શ્રમજનિરભૂવં ન ચ ધની ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૬॥

ન બાધન્તે દારા કિમિદમધુના મે પ્રિય દિશે-
    ત્યમું મા દારિદ્ર્યવ્યસનપરિપિણ્ડીકૃતહૃદયમ્ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૭॥

મહોદારે ભૂમ્નિ ત્વયિ પિતરિ પુત્રોઽહમધુના
    જરત્કાકાવસ્થાં ભૃશમનુભવામીશ કિમિદમ્ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૮॥

ગુરોઃ પુત્રઃ સુકવિરવધૂતઃ સ્તવમહં
    ચકારૈકશ્વાસાત સરલમિમમાદૃત્ય પઠતામ્ ।
પ્રદાતું સ્વચ્છન્દં દ્રવિણમનૃણં વત્સલ ગુરો
    કલત્રાદ્યૈઃ સાકં સતતમનુભોક્તું ચ વિતર ॥ ૯॥

ઇતિ શ્રીકૃષ્ણાવધૂતવિરચિતે શ્રીરાઘવેન્દ્રતન્ત્રે નવમપટલે
    દારિદ્ર્યમોચનસ્તોત્રં નામ નવમોઽધ્યાયઃ સમ્પૂર્ણઃ ।

Proofread by Gopalakrishnan, PSA Easwaran

*Shri Raghavendra Daridryamochana Stotram*
pdf was typeset on December 18, 2021

Please send corrections to *sanskrit@cheerful.com*